Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 1 | ISSN : 2582-0095

# साम्प्रतिककाले धर्मशास्त्रस्य प्रासङ्गिकता



डॉ.सुधांशुशेखरमहापात्रः,
सहायकाचार्यः, धर्मशास्त्रविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः।

**Article Info**
Volume 4 Issue 1
Page Number: 33-38
Publication Issue :
January-February-2021

**Article History**
Accepted : 10 Jan 2021
Published : 22 Jan 2021

**सारांशः-** भारतवर्षे विरचितेषु विभिन्नेषु शास्त्रेषु धर्मशास्त्रस्य प्राशस्त्यं प्रामाण्यञ्च सुविदितचरम्। वैदिककालादनन्तरं प्रादुर्भूतेषु त्रिविधेषु स्मृतिसूत्रनिबन्धात्मकेषु धर्मशास्त्र-साहित्येषु प्रामुख्येनैवाचारव्यवहारप्रायश्चित्तविषया विचारिता दृश्यन्ते। धर्मशास्त्रमिदं लोकोपकारकं सामाजिकं शास्त्रम्। लोके शास्त्रस्य बहुलमुपयोगित्वं विद्यते। धर्मशास्त्रे आलोचितानां पाप-प्रायश्चित्त-श्राद्ध-शुद्धि-देवार्चन-स्नान-होम-जप-तीर्थाटनोपवासप्रभृतीनां कर्मणामदृष्टैकफलत्वेन नास्तिकैरप्रत्यक्षीकृतत्वेन महत्युपादेयता विद्यते। अतः साम्प्रतिककाले अस्य धर्मशास्त्रस्य प्रासङ्गिकता इति विषये साम्प्रतं मया आलोच्यते।

**मुख्यशब्दः –** धर्मशास्त्र, वेदः, नैयायिकैः, धर्मः।

---

वेदाङ्गेष्वन्यतमस्य कल्पस्यावान्तरभेदरूपेण वेदानुमापकत्वेन च धर्मशास्त्रं विदितचरं समेषाम्। धर्मार्थकाममोक्षेषु चतुर्षु पुरुषार्थेषु धर्मस्यैव प्राधान्यं प्रामाण्यञ्चेति सर्वे स्वीकुर्वन्ति। [i]"धर्मो विश्वस्य जगतः प्रतिष्ठा, लोके धर्मिष्ठं प्रजा उपसर्पन्ति, धर्मेण पापमपनुदति, धर्मे सर्वं प्रतिष्ठितं, तस्मात् धर्मं परमं वदन्ती"त्यादिना धर्मस्य प्रशंसा साक्षाद् वेदेन कृता दृश्यते। 'श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृति'रिति [ii]मनुवचनात् धर्मशास्त्रं स्मृतिशब्देनापि व्यपदिश्यते।

श्रुतिस्मृतिवत् शास्त्रान्तराण्यपि धर्मशास्त्रस्य प्रामाण्यं स्वीकृत्य प्रशंसां कुर्वन्ति। तत्र 'सांख्यस्मृत्यास्ति सङ्कोचोऽथवा वेदसमन्वये' इत्यादिना [iii] उत्तरमीमांसायां ब्रह्मणो जगत्कर्त्तत्वविचारप्रसङ्गे साङ्ख्यशास्त्रापेक्षया मन्वादिधर्मशास्त्रस्य प्राबल्यं प्रदर्श्य प्रामाण्यं प्रदर्शितम्।

'विहितकर्मजन्योधर्मः' इति [iv]नैयायिकैः, 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' इति [v]वैशेषिकैश्च धर्मस्य लक्षणं कुर्वद्भिः धर्मशास्त्रस्य प्रामाण्यमङ्गीकृतम्। 'तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

यज्ञेन' इत्यादिश्रुतेः 'तपसा किल्विषं हन्ती'त्यादिस्मृतेश्च [vi]वेदान्तोऽपि धर्मशास्त्रस्य प्रामाण्यमभ्युपगच्छति। सांख्यशास्त्रे [vii]तत्त्वकौमुद्यास्वतः प्रमाणस्य युक्तत्वमभिधातुमेवं वेदमूलस्मृती-तिहासपुराणवाक्यजनितमपि ज्ञानं युक्तं भवतीति प्रतिपादतया वाचस्पतिमिश्रेण प्रत्यक्षवेदमूलत्वेन मन्वादिस्मृतीनां प्रामाण्यं स्वीकृतम्। [viii]व्याकरणशास्त्रे भगवता पतञ्जलिना 'मिदचोऽन्त्यात् परः' इति सूत्रस्य भाष्यं कुर्वता नैवेश्वर आज्ञापयति, नापि धर्मसूत्रकाराः पठन्ति, अपवादैरुत्सर्गा बाध्यन्तामित्यादिना धर्मशास्त्रस्य प्रामाण्यमभ्युपगतम्। 'अथातो धर्मजिज्ञासा' इत्यादिना ग्रन्थारम्भं कुर्वन् [ix]पूर्वमीमांसाकारो जैमिनिरपि धर्मशास्त्रस्य धर्मस्य च प्रामाण्यं प्रादर्शयत्।

साहित्येऽपि [x] काव्यप्रकाशकृता मम्मटाचार्येण काव्यहेतुप्रसङ्गे शास्त्राणां च्छन्दो-व्याकरणाभिधानकोश-कलाचतुर्वर्ग-गज-तुरगादिलक्षणग्रन्थानामितिवृत्तौ यत् चतुर्वर्गपदं प्रयुक्तं तेन धर्मार्थकाममोक्षाणां बोधनात् तत्प्रतिपादकस्य धर्मशास्त्रस्य प्रामाण्यं सुतरां प्रदर्शितम्। पुनश्च [xi]कौटलीयार्थशास्त्रे-

**व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितिः।**
**त्रय्याः हि रक्षितो लोकः प्रसीदति न सीदति।। इति।।**

एतेन वर्णाश्रमधर्मस्य प्रशंसां कुर्वता कौटल्येन धर्मशास्त्रस्यापि प्रामाण्यं स्वीकृतम्। ज्योतिःशास्त्रे युगमानप्रसङ्गे मनुस्मृत्युक्तयुगमानमाश्रित्य गणनाप्रवृत्ते धर्मशास्त्रस्य प्रामाण्यं तथापि स्वीकृतम्। [xii] रघुवंशमहाकाव्ये कविकुलगुरुणा कालिदासेन श्रुतेरिवार्थं स्मृतिरन्वगच्छदित्यादिना स्मृतेः प्रामाण्यं प्रतिपादितम्। पुनश्च-

**अग्निहोत्रं यथा कार्य राजकार्य तथैव हि।**
**वेदोक्तत्वात् स्मृतिप्रोक्तं कर्त्तव्यत्वान्मनीषिभिः।। इति।।**

इत्यादिना [xiii]सङ्गीतशास्त्रेऽपि धर्मशास्त्रस्य प्रशंसया सह प्रामाण्यमभ्युपगताम्।

एतेन श्रुतेरारभ्य संगीतशास्त्रं यावत् सर्वैः शास्त्रैः धर्मशास्त्रस्य प्रामाण्यं स्वीकृतमिति ज्ञायते। एवंभूतं प्रामाणिकं यद् धर्मशास्त्रं तस्य युगे युगे प्रामाण्यं प्रासङ्गिकता च विद्यत एवेत्यत्र नास्ति संशयः। धर्मशास्त्रमिदं लोकोपकारकं सामाजिकं शास्त्रम्। लोके शास्त्रस्य बहुलमुपयोगित्वं विद्यते। धर्मशास्त्रे पाप-प्रायश्चित्त-श्राद्ध-शुद्धि-देवार्चन-स्नान-होम-जप-तीर्थाटनोपवासप्रभृतीनां कर्मणा-मदृष्टैकफलत्वेन नास्तिकैरप्रत्यक्षीकृतत्वेन चाप्रामाण्यमिति यद्यपि केचन संगीरन्ते तथापि सामाजिकवैज्ञानिकदृष्ट्या धर्मशास्त्रस्य प्रत्यक्षफलदायकत्वेन महत्युपादेयता विद्यते। यथा शास्त्रान्तराणि धर्मशास्त्रस्य प्रामाण्यं स्वीकुर्वन्ति तथा धर्मशास्त्रेऽपि बहूनां शास्त्राणां समावेशेन प्रामाण्यमपि समुपन्यस्तम्।

धर्मशास्त्रे प्रतिपादितं शरीरतत्त्वमाधुनिकवैज्ञानिकानपि चमत्करोति। तत्र [xiv]याज्ञवल्क्यमतानुसारेण गर्भ भ्रूणः प्रथमे मासि द्रवीभूतः, द्वितीयेऽर्बुदाकारः, तृतीये इन्द्रिययुक्तः, चतुर्थेऽङ्गप्रत्यङ्गानां स्थिरता,

पञ्चमे भ्रूणशरीरे रक्तोत्पत्तिः, षष्ठे बल-वर्ण-रोम्णाञ्चाविर्भावः, सप्तमे नाडीनां स्नायूनां वातपित्तश्लेष्माणां शिराणाञ्च समुत्पत्तिः, अष्टमे ओजस उत्पत्तिः, नवमे मासि च पूर्णतयोत्पत्तिः सम्पद्यते।

पुनश्च मनुष्यस्य सर्वाङ्गशरीरे आहत्य षष्ट्युत्तरत्रिशत(360) संख्यकानि अस्थीनि, नवशतानि स्नायवः, पञ्चशतानि मांसपेश्यः, द्विशतधमन्यः, लक्षत्रयसंख्यकाः श्मश्रुकेशाः, चतुः पञ्चाशत्कोट्यः सप्तोत्तरषष्टिलक्षाः सार्द्धपञ्चाशत्सहस्रसंख्यकानि(546750500) रोमाणि च सन्ति। पुनश्चास्मिन् शरीरे नवाञ्जलिपरिमिता रसाः, दशाञ्जलयः आपः, सप्ताञ्जलिपरिमितानि मलानि, अष्टाञ्जलिपरिमिताः रक्ताः, अञ्जलिषट्कं श्लेष्म, अञ्जलिपञ्चकं पित्तम्, अञ्जलिचतुष्टयपरिमितं मूत्रं, अञ्जलित्रयं वसा, अञ्जलिद्वयं मेदः, एकाञ्जलिपरिमिता मज्जा, अर्द्धाञ्जलिपरिमितं रेतश्च विद्यते।

धर्मशास्त्रे विज्ञानस्यापि महती चर्चा कृता दृश्यते। यद् भौतिकविज्ञानं सम्प्रति वैज्ञानिकैर्दृक्सिद्धमित्युद्घोष्यते तद् बहुकालात् पूर्वं [xv]मनुना समुद्भावितम्। यथा आकाश शब्दगुणकं, तस्माद् वायुः, वायोरग्निरग्नेर्जलं, जलाच्च पृथिवीति क्रमेण तत्तद्धर्मयुक्ताः सृष्टा अभूवन्। यथोक्तं तेन-

**आकाशाज्जायते तस्मात् तस्य शब्दगुणं विदुः।**
**आकाशात्तु विकुर्वाणात् सर्वगन्धवहः शुचिः।।**
**बलवान् जायते वायुः स वै स्पर्शगुणो मतः।**
**वायोरपि विकुर्वाणाद् विरोचिष्णु तमोनुदम्।।**
**ज्योतिरूत्पद्यते भास्वत् तद्रूपगुणमुच्यते।**
**ज्योतिषश्च विकुर्वाणादापो रसगुणाः स्मृताः।**
**अद्भ्यो गन्धगुणा भूमिरित्येषा सृष्टिरादितः।। इति।।**

पुनश्च प्राणिनां जीवनधारणार्थं जगति सुस्थपरिवेश्स्य सुतरामावश्यकता विद्यते। परिवेशोऽयं यथा प्रदूषितो न स्यात् तदर्थं [xvi]मनुना या व्यवस्था विहिता साऽवश्यमवधेया। तत्रादौ जलप्रदूषणनिषेधार्थं 'नाप्सु मूत्रं पुरीषं वा' इत्यादिना जले मलमूत्रोत्सर्जनस्य निषेधोऽकारि। [xvii] 'वस्त्रपूतं जलं पिवेदि'त्यादिना शुद्धजलस्य पानं सर्वदा तेनोपदिष्टम्। पुनश्च महायन्त्रप्रभृतीनां प्रवर्त्तनं, सर्वेष्वाकरेष्वधिकार ओषधीनां हिंसा, इन्धनार्थं द्रुमच्छेद इत्यादीनामेकैकशो निषेधाद् वायोः प्रदूषणं निवारितम्। प्रसङ्गेऽस्मिन् यथोक्तं [xviii]मनुना-

**सर्वाकरेष्वधिकारो महायन्त्रप्रवर्त्तनम्।**
**इन्धनार्थमशुष्काणां द्रुमाणामवपातनम्।। इति।।**

प्राणिनां श्वासप्रश्वासार्थमम्लजानसंज्ञको यो वायुरपेक्ष्यते तस्य संग्रहो वृक्षादिभ्यो भवतीति हेतोः सम्प्रति शासकैः वृक्षच्छेदननिषेधस्य वृक्षरोपणविधेश्च प्रणयनं कृतम्। परन्तु तस्याः व्यवस्थायाः मूलं खलु धर्मशास्त्रम्। धर्मशास्त्रेषु वृक्षच्छेदननिषेधस्य वृक्षरोपणविधेश्च प्रणयनं पापपुण्यादिभावनया व्यवस्थितं येन जनानां तत्र निवृत्ति-प्रवृत्तिरूपो धर्मः परिपाल्यते। येन परिवेशस्य सुरक्षया सह प्रकृतोर्भारस्याम्यं स्यात्। प्रसङ्गेऽस्मिन् [xix]मनुना निगदितं यत्-

**फलदानान्तु वृक्षाणां च्छेदने जप्यमृकशतम्।**
**गुल्मवल्लीलतानाञ्च पुष्पितानाञ्च वीरूधाम्।।**
**वनस्पतीनां सर्वेषामुपयोगो यथा यथा।**
**तथा तथा दमः कार्यो हिंसायामिति धारणा।। इति।।**

पुनश्च-

**अश्वत्थ एक पिचुमर्द एको द्वौ चम्पकौ त्रीणि च केशराणि।**
**सप्ताथ ताला नव नारिकेला, पञ्चाम्ररोपीनरकं न याति।। इति।।**

तिथितत्त्वे एतेषां प्रतिपादनात् जनानां रुचिस्तत्र समुत्पादिता। अपि च संस्काराणामनुष्ठानार्थं धर्मशास्त्रेषु या व्यवस्था विहिता सा अदृष्टफलकेति साम्प्रतिका मन्यन्ते। परन्तु नैतत् समीचीनम्। संस्काराणां सामाजिकी भूमिकाऽतीव महत्त्वपूर्णा। गर्भाधानादारभ्य विवाहसंस्कारं यावत् सर्वेषां संस्काराणां सामाजिकमूल्यबोधः सुतरां विद्यते। तत्र गर्भाधानस्य कः कालः कदा स्त्रीगमने उत्तमाः प्रजा जायेरन् इत्यादिप्रसङ्गे 'षोडशर्त्तुः निशाः स्त्रीणाम्', 'स्वदारनिरतश्चैव' इत्यादि [xx]याज्ञवल्क्येन 'ऋतावुपेयादि'ति [xxi]गौतमवचनेन, 'मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेदि'ति [xxii]मनुवचनेन च या व्यवस्था समाजे विहिता तेन समाजः शृङ्खलितः व्यभिचाररहितः सुस्थश्च सञ्जायते।

शासनशृङ्खलार्थं मन्वादिधर्मशास्त्रकारैर्यो राजधर्म उपदिष्टः, दुष्टानां निग्रहार्थं या कठोरदण्डव्यवस्था च विहिता तस्माद् दण्डाद् भीता एव तदा जना सर्वे शृङ्खलिता निरुपद्रवाश्चासन्। तात्कालिकीं शासनपद्धतिमनुसृत्य यदि सम्प्रति देशे शासकाः प्रवर्त्तेरन् तर्हि पुनरेवात्र रामराज्यस्य प्रतिष्ठा भवितुमर्हति। एवं धर्मशास्त्रेषु बह्वय व्यवस्थाः सन्ति याः काले काले युगे युगे च लोकानामुपकाराय कल्प्यन्ते।

प्रबन्धेऽस्मिन् स्थालीपुलाकन्यायेन दिङ्मात्रं मया समुपस्थापितम्। वस्तुतो धर्मशास्त्रमेकमात्रं शास्त्रं यस्यानुसरणेन मानवः पूर्णविकसितमनुष्यरूपेण शृङ्खलितसमाजं सृष्ट्वा मानवतां प्रतिष्ठापयितुं प्रभवत्। ये केचन तथाकथिता आधुनिका पाखण्डिनः मनुस्मृतिं मनुवादञ्च तिरस्कुर्वन्ति ते पितृद्वेष्टारो भवन्ति। यतो हि समग्रमानवसमाजस्य स्रष्टा मनुरेव। मनोरपत्यं पुमान् मानवः। अतएव य एवं द्वेष्टि नाऽसौ मानवः स पशुरेव। अतः साम्प्रतिके काले शास्त्रान्तरापेक्षया धर्मशास्त्रस्य महदुपादेयत्वं विद्यते येन समग्रं लोकतन्त्रं शृङ्खलितं संयतं व्यवस्थितमुपकृतञ्च भवितुमर्हतीति।

---

**पादटिप्पणी**

1 .तैत्तिरीयारण्यकम्- 10/63

2. मनुस्मृतिः – 2/9

3. उत्तरमीमांसा- 2/1

4. तर्कसंग्रहः, पृष्ठा- 99

5. वैशेषिकसूत्रम्- 1/1/1

6. वेदान्तसारः, पृष्ठा- 54

7. सांख्यतत्त्वकौमुदी, पृष्ठा- 111

8. व्याकरणमहाभाष्यम्- 1/1/47

9. पूर्वमीमांसासूत्रम्- 1/1/1

10 . काव्यप्रकाशः, प्रथमोल्लासे

11. कौटलीयार्थशास्त्रम्- 1/3

12. रघुवंशम्, तृतीयसर्गे

13. संगीतपारिजाते- 1/4

14. याज्ञवल्क्यस्मृतिः – 3/75-107

15 .मनुस्मृतिः – 1/75,78

16. तत्रैव- 4/56

17. तत्रैव- 6/46

18. तत्रैव- 11/63

19. तत्रैव- 11/142

20. याज्ञवल्क्यस्मृतिः – 1/79, 1/81

21. गौतमधर्मसूत्रम्- 1/5/1

22. मनुस्मृतिः – 2/215

**सन्दर्भग्रन्थसूची**

काव्यप्रकाशः – संस्कृत पुस्तकभाण्डार, कलिकाता, 2008
कौटलीयार्थशास्त्रम् – आर.पी.कागलो, मुम्बाई, 1966
गौतमधर्मसूत्राणि –चौखम्भा संस्कृत संस्थान, वाराणसी, 2005
तर्कसंग्रहः –हरिकृष्णनिबन्धभवनम्, 1960
तैत्तिरीयारण्यकम् –आनन्दाश्रमसंस्कृतग्रन्थावली, 1967
पूर्वमीमांसासूत्रम् –चौखम्बा संस्कृत सिरीज आफिस्, वाराणसी. 1916
ब्रह्मसूत्रशांकरभाष्यम् –निर्णयसागरप्रेस, मुम्बई, 1904
मनुस्मृतिः –मोतिलालवनारसीदास, वाराणसी, 1990
महाभारतम् –भण्डारकर ओरिएण्टालरीसर्च इन्ष्टिच्युट, पुना, 1972
याज्ञवल्क्यस्मृतिः –चौखम्बासंस्कृतप्रतिष्ठान, दिल्ली, 2005
रघुवंशम् –चौखम्बासंस्कृतसंघटन, वाराणसी, 1985

व्याकरणमहाभाष्यम्  –विद्यानिधि शोधसंस्थान, कुरुक्षेत्र, 2006
वेदान्तसारः  –राष्ट्रियसंस्कृतसाहित्यकेन्द्र, जयपुर, 2005
वैशेषिकसूत्रम्  –एसियाटिक सोसाइटि, कलिकाता, 1909
सङ्गीतपारिजातः  –चौखम्बा संस्कृत सीरिज, वाराणसी, 1987
सांख्यतत्वकौमुदी  –मोतिलालवनारसीदास, दिल्ली, 1979